# Sudarshanachakrakritam Vishnu Stotram

# સુદર્શનચક્રકૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Sudarshanachakrakritam Vishnu Stotram

File name : sudarshanachakrakRRitaMviShNustotram.itx

Category : vishhnu, vishnu, tAmraparNImAhAtmya, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 59/40-53||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# સુદર્શનચક્રકૃતં વિષ્ણુસ્તોત્રમ્

નમસ્તે દેવદેવેશ વાસુદેવાય વિષ્ણવે ।
નારાયણાય નાલીકનયનાય નમો નમઃ ॥ ૪૦॥

નાથ નારાયણ વિભો નલિનાયતલોચન ।
પ્રસીદ કરુણામૂર્તે પ્રસીદ જગતાં ગુરો ॥ ૪૧॥

યમેકમીશમાદ્યન્તમનન્તમકુતોભયમ્ ।
અક્ષરમનિર્દેશ્યં શરણં યામિ શાશ્વતમ્ ॥ ૪૨॥

પુરાણમાદ્યં પુરુષં વૃષસેનં વૃષાકપિમ્ ।
વેદાન્તવેદ્યં વિશ્વસ્ય જનિતારમુપાસ્મહે ॥ ૪૩॥

તારકઃ પરમો યોગી યોગિધ્યેયાઙ્ઘ્રિપઙ્કજઃ ।
સ મે ગતિરનન્તાત્મા સર્વસાક્ષી જગદ્ગુરુઃ ॥ ૪૪॥

ગુણાતીતઃ પરઃ શુદ્ધો હંસાખ્યઃ પ્રપિતામહઃ ।
શ્રુતિકર્મઃ પુમાન્ સાક્ષાદાવિરસ્તુ પુરો હરિઃ ॥ ૪૫॥

અણોરણીયાનાત્મા ચ મહતોઽપિ મહાન્ મહાન્ ।
મમૈવ દૃશિ સમ્ભૂયાન્મોહાન્ધધ્વાન્તભાસ્કરઃ ॥ ૪૬॥

શ્યામો હિરણ્યપરિધિઃ વનમાલાવિભૂષિતમ્ ।
શ્રીપતિં શરણં યામિ વિશ્વસ્યાસ્યૈવહેતુકમ્ ॥ ૪૭॥

આલોલતુલસીદામમારૂઢવિનતાસુતમ્ ।
જ્યોતિરિન્દીવરશ્યામમાવિરસ્તુ મમાગ્રતઃ ॥ ૪૮॥

નમો નમઃ પુરાણાય પુરુષાયાદિવેધસે ।
સતાં સન્માર્ગબન્ધૂનાં પરિત્રાણાય સાધવે ॥ ૪૯॥

સત્ત્વમેકાક્ષરં જ્યોતિરાકારઃ ખગરૂપકઃ ।
યત્તમન્તસ્સ્મરામ્યેતત્ પઞ્ચમસ્વરમક્ષરઃ ॥ ૫૦॥

ખગો ભોક્તા ચ કર્માત્મા પુરુષો વ્યઞ્જનાત્મકઃ ।
ઊર્ધ્વતિર્યગ્ગતઃ સ્વાન્તઃ કેશવો દયિતો મમ ॥ ૫૧॥

શેષાઙ્કશાયિનમશેષગુરું પુરાણં
નારાયણં ત્રિજગતાં પ્રણતાપવર્ગમ્ ।
નાથં વ્રજામિ શરણં કરુણામૃતાબ્ધિં
નાસ્ત્યત્ર મે વિશતિ ચિત્તમિદં મુકુન્દાત્ ॥ ૫૨॥

ઇત્થં સ્તુવતિ વૈ તસ્મિન્ ચક્રરાજે સુદર્શને ।
પ્રાદુર્બભૂવ ભગવાન્ પ્રસન્નાત્મા જનાર્દનઃ ॥ ૫૩॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે ૫૯-અધ્યાયાન્તર્ગતં
સુદર્શનચક્રકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૫૯/૪૦-૫૩॥

tAmraparNImAhAtmya . adhyAya 59/40-53..

Proofread by PSA Easwaran

*Sudarshanachakrakritam Vishnu Stotram*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*